**19R**

# टिळक महाराष्ट्र विद्यापीठ, पुणे

**संस्कृत विशारद (बी.ए.) – नियमित**

**परीक्षा : डिसेंबर – २०२३**

**सत्र ६ वे**

**विषयः कादम्बरी** (19R462)

**दिनांक :** १५/१२/२०२३ **गुण :** ६० **वेळ :** दु. २.०० ते ४.३०

**सूचना : सर्व प्रश्न अनिवार्य**

**प्र.१. पाठ्यपुस्तके प्रयुक्तानां योग्यशब्दानां चयनं कृत्वा पुनर्लिखत।** **(१८)**

१) एवं च क्रमेण निर्वर्तिताभिषेको विषधरनिर्मोकपरिलघुनि धवले परिधाय धौतवाससी शरदम्बरैकदेश इव जलक्षालननिर्मलतनुः, अतिधवलजलधरच्छेदशुचिना दुकूलपट्टपल्लवेन तुहिनगिरिरिव गगनसरित्स्रोतसा कृतशिरोवेष्टनः, संपादितपितृजलक्रियो मन्त्रपूततोयाञ्जलिना दिवसकरमभिप्रणम्य देवगृहमगमत्। उपरचितपशुपतिपूजश्च निष्क्रम्य देवगृहान्निर्वर्तिताग्निकार्यो विलेपनभूमौ चन्दनेनानुलिप्तसर्वाङ्गो कृतवस्त्रपरिवर्तो रत्नकर्णपूरमात्राभरणः समुचितभोजनैः सह भूपतिभिराहारमभिमतरसास्वादजातप्रीतिरवनीपो निर्वर्तयामास।

२) सुभाषितं हारि विषत्यधो गलान्न दुर्जनस्यार्करिपोरिवामृतम्। तदेव धत्ते हृदयेन सज्जनो हरिर्महारत्नमिवातिनिर्मलम्।। बभूव वात्स्यानवंशसंभवो द्विजो जगद्गीतगुणोऽग्रणीःसताम्। अनेकगुप्तार्चितपादपङ्कजः कुबेरनामांश इव स्वयंभुवः।।

३) देव, द्वारस्थिता सुरलोकमारोहतस्त्रिशङ्कोरिव कुपितशतमखहुङ्कारनिपातिता राजलक्ष्मीर्दक्षिणापथादागता चाण्डालकन्यका पञ्जरस्थं शुकमादाय देवं विज्ञापयति ‘सकलभुवनतलरत्नानामुदधिरिवैकभाजनं देवः। विहङ्गमश्चायमाश्चर्यभूतो निखिलभुवनतलरत्नमिति कृत्वा देवपादमूलमादायागताहमिच्छामि देवदर्शनसुखमनुभवितुम्’ इति। एतादाकर्ण्य ‘देवः प्रमाणम्’ इत्युक्त्वा विरराम। उपजातकुतूहलस्तु राजा समीपवर्तिनां राज्ञामालोक्य मुखानि ‘को दोषः, प्रवेश्यताम्’ इत्यादिदेश।

४) नाम्नैव यो निर्भिन्नारातिहृदयो विरचितनारसिंहरूपाडम्बरम्, एकविक्रमाक्रान्तसकलभुवनतलो विक्रमत्रयायासितभुवनत्रयं च जहासेव च वासुदेवम्, अतिचिरकाललग्नमतिक्रान्तकुनृपति–सहस्रसम्पर्ककलङ्कमिवक्षालयन्ती यस्य विमले कृपाणजलधाराजले चिरमुवास राजलक्ष्मीः। यश्च मनसि धर्मेण, कोपे यमेन, प्रसादे धनदेन, प्रतापे वह्निना, भुजे भुवा, दृशि श्रिया, वाचि सरस्वत्या, मुखे शशिना, बले मरुता, प्रज्ञायां सुरगुरुणा, रूपे मनसिजेन, तेजसि सवित्रा च वसता सर्वदेवमयस्य प्रकटितविश्वरूपाकृतेरनुकरोति भगवतो नारायणस्य।

५) एकदा तु नातिदूरोदिते नवनलिनदलसंपुटाभिदि किंचिन्मुक्तपाटलिम्नि भगवति सहस्रमरीचिमालिनि राजानमास्थनमण्डपगतमङ्गनाजनविरुद्धेन वामपार्श्वालम्बिना कौक्षेयकेण संनिहितविषधरेव चन्दनलता भीषणरमणीयकृतिः, चूडामणिप्रतिबिम्बच्छलेन राज्ञाज्ञेव मूर्तिमती राजभिः शिरोभिरुह्यमाना क्षितितलनिहितजानुकरकमला सविनयमब्रवीत्।

**प्र.२. ससंदर्भं स्पष्टीकरणं कुरुत।** **(२४)**

१) त्रिगुणात्मने नमः।
२) देव, महतीयं कथा।
३) भयपलायिता कालिन्दी।
४) निद्रामिव लोचनग्राहिणीम्
५) हरन्ति सन्तो मणिनूपुरा इव।
६) करतलोपमानममृतायते।

**प्र.३. टिप्पणीद्वयं लिखत।** **(१२)**

१) वैशम्पायनस्य गुणाः २. मातङ्गकन्या ३. शूद्रकस्य राजधानी

**प्र.४. योग्यशब्दानां चयनं कृत्वा पुनर्लिखत।** **(०६)**

१) असज्जनात् कस्य ………… न जायते। (भयः, भयम्, भीतिः)
२) अथ ……… तां मातङ्गकुमारीं प्रावेशयत्। (राजसेविका, प्रतीहारी, द्वारपालिका)
३) अपनयतु नः …………। (प्रश्रम्, उत्तरम्, कुतूहलम्)
४) ……… इव जितमन्मथः। (शिवः, शम्भुः, हरः)
५) राजनि पालयति सति ……… कनकदण्डाः। (राजसभायां, छत्रेषु, अपराधेषु)
६) सा ………… अद्राक्षीत् । (महीपालम्, पृथिविपतिम्, राजानम्)

----------